0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

त्रैलोक्यविजया

अपराजिता स्तोत्र

इन्द्राक्षी स्तोत्र और धनदा देवी स्तोत्र

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

त्रैलोक्य विजया
अपराजिता स्तोत्र
इन्द्राक्षी स्तोत्र
और
धनदा देवी स्तोत्र

संग्रहकर्ता : पं. कपिल मोहन जी

SCANNED

मूल्य : 20.00

रण
पूजा-पाठ व ज्योतिष पुस्तकों के लिए
नाथ पुस्तक भण्डार
194, दरीबा कलां, दिल्ली-6, दूरभाष 23275344

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अनुक्रम

१.	अपराजिता स्तोत्र	३
२.	इन्द्राक्षी स्तोत्र	१९
३.	धनदा स्तोत्र	२५
४.	धनदा देवी स्तोत्र	२७
५.	धनदा कवच	३०

प्रकाशक : **रणधीर प्रकाशन**
रेलवे रोड (आरती होटल के पीछे), हरिद्वार-249401
फोन : (01334) 226297

वितरक : **रणधीर बुक सेल्स**
रेलवे रोड, हरिद्वार, फोन : (01334) 228510

दिल्ली विक्रेता : **गगन बुक डिपो**
4694, चरखेवालान (निकट नई सड़क, दाईवाड़ा)
दिल्ली-6,

APRAJITA STROTRA
Collected by : Pt. Kapil Mohan Jee
Published by : Randhir Prakashan, Hardwar (India)

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अपराजिता स्तोत्र

इस स्तोत्र का विधिवत पाठ करने से सब प्रकार के रोग तथा सब प्रकार के शत्रु और सब तरह का बन्ध्या दोष नष्ट होता है। विशेष रूप से मुकदमें में सफलता और राजकीय कार्यों में अपराजित रहने के लिए यह पाठ रामबाण है।

ॐ नमोऽपराजितायै। ॐ अस्या वैष्णव्याः पराया अजिताया महाविद्यायाः॥ वामदेव-बृहस्पति-मार्कण्डेया ऋषयः। गायत्र्युष्णिगनुष्टुब्बृहती छन्दांसि लक्ष्मीनृसिंहो देवता। ॐ क्लीं श्रीं ह्रीं बीजम्। हुं शक्तिः। सकलकामनासिद्ध्यर्थम् अपराजित-विद्यामन्त्रपाठे विनियोगः। ॐ नीलोत्पल-दलश्यामां भुजंगाभरणान्विताम्।

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

शुद्धस्फटिकसंकाशां चन्द्रकोटिनिभाननाम्॥
शंखचक्रधरां देवी वैष्णवीमपराजिताम्
बालेन्दुशेखरां देवीं वरदाभयदायिनीम॥
नमस्कृत्य पपाठैनां मार्कण्डेयो महातपाः।
मार्कण्डेय उवाच-शृणुष्वं मुनयः सर्वे
सर्वकामार्थसिद्धिदाम्। असिद्धसाधनीं देवीं
वैष्णवीमपराजिताम्॥ ॐ नमो नारायणाय,
नमो भगवते वासुदेवाय, नमोस्त्वनन्ताय,
सहस्रशीर्षाय, क्षीरोदार्णवशायिने, शेष
भोगपर्य्यङ्काय, गरुड़वाहनाय, अमोघाय,
अजाय, अजिताय, पीतवाससे, ॐ वासुदेव,
संकर्षण प्रद्युम्न, अनिरुद्ध, हयग्रीव, मत्स्य,

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

कूर्म्म, वाराह, नृसिंह, अच्युत, वामन, त्रिविक्रम, श्रीधर, राम, राम, राम। वरद, वरद, वरदो भव, नमोऽस्तु ते, नमोऽस्तुते, स्वाहा, ॐ असुर-दैत्य-यक्ष-राक्षस-भूत-प्रेत-पिशाच-कूष्माण्ड-सिद्ध-योगिनी-डाकिनी-शाकिनी-स्कन्दग्रहान् उपग्रहान्न-क्षत्रग्रहांश्चान्या् हन हन् पच पच मथ मथ विध्वंसय विध्वंसय विद्रावय विद्रावय चूर्णय चूर्णय शंखेन चक्रेण बज्रेण शूलेन गदया मुसलेन हलेन भस्मीकुरु कुरु स्वाहा। ॐ सहस्रबाहो सहस्रप्रहरणायुध, जय जय, विजय विजय, अजित, अमित, अपराजित,

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

अप्रतिहत, सहस्रनेत्र, ज्वल ज्वल, प्रज्वल
प्रज्वल, विश्वरूप बहुरूप, मधुसूदन,
महावराह, महापुरुष, वैकुण्ठ, नारायण,
पद्मनाभ, गोविन्द, दामोदर, हृषीकेश,
केशव, सर्वासुरोत्सादन, सर्व भूतवशंकर,
सर्वदुःस्वप्नप्रभेदन, सर्वयंत्रप्रभञ्जन,
सर्वनागविमर्दन, सर्वदेवमहेश्वर,
सर्वबन्धविमोक्षण, सर्वाहितप्रमर्दन,
सर्वज्वरप्रणाशन, सर्वग्रहनिवारण,
सर्वपापप्रशमन, जनार्दन, नमोऽस्तुते स्वाहा।
विष्णोरियमनुप्रोक्ता सर्वकामफलप्रदा।
सर्वसौभाग्यजननी सर्वभीतिविनाशिनी।

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

सर्वैश्च पठितां सिद्धैर्विष्णोः परमवल्लभा। नानया सदृशं किंचिद्दुष्टानां नाशनं परम्। विद्या रहस्या कथिता वैष्णव्येषापराजिता। पठनीया प्रशस्ता वा साक्षात्सत्त्वगुणाश्रया। ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥ अथातः संप्रवक्ष्यामि ह्यभ्यामपराजिताम्। या शक्तिर्मामकी वत्स रजोगुणमयी मता। सर्वसत्त्वमयी साक्षात्सर्वमंत्रमयी च या। या स्मृता पूजिता जप्ता न्यस्ता कर्मणि योजिता। सर्वकामदुधा वत्स! शृणुष्वैतां ब्रवीमि ते। य इमामपराजितां परमवैष्णवी-

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मप्रतिहतां पठति सिद्धां स्मरति सिद्धां महाविद्यां जपति पठति शृणोति स्मरति धारयति कीर्तयति वा न तस्याग्निवायुवज्रोपलाशनिवर्षभयं, न समुद्रभयं, न ग्रहभयं, न चौरभयं, न शत्रुभयं, न शापभयं वा भवेत्। क्वचिद्रात्र्यन्धकारस्त्रीराजकुलविद्वेषिविषगरगरदवशीकरणविद्वेष्णोच्चाटनवधबन्धनभयं वा न भवेत्। एतैर्मन्त्रैरुदाहृतैः सिद्धैः संसिद्धपूजितैः। ॐ नमोऽस्तुते। अभये, अनघे, अजिते, अमिते, अमृते, अपरे, अपराजिते पठति सिद्धे जपति सिद्धे, स्मरति सिद्धे, एकोनाशीतितमे, एकाकिनि,

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-C

निश्चेतसि, सुद्रुमे, सुगन्धे, एकान्नशे, उमे ध्रुवे, अरुन्धति, गायत्रि, सावित्रि, जातवेदसि, मानस्तोके, सरस्वति, धरणि, धारणि, सौदामनि, अदिति, दिति, विनते, गौरि, गांधारि, मातंगी कृष्णे, यशोदे, सत्यवादिनि, ब्रह्मवादिनि, कालि, कपालिनि, करालनेत्रे, भद्रे, निद्रे, सत्योपयाचनकरि, स्थलगतं जलगतं अन्तरिक्षगतं वा मां रक्ष सर्वोपद्रवेभ्यः स्वाहा। यस्याः प्रणश्यते पुष्पं गर्भो वा पतते यदि। म्रियते बालको यस्याः काकबन्ध्याच या भवेत्॥ धारयेद्या इमां विद्यामेतैर्दोषैर्न

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

लिप्यते॥ गर्भिणी जीववत्सा स्यात्पुत्रि-
णीस्यान्न संशयः। भूर्जपत्रे त्विमां विद्यां
लिखित्वा गन्धचन्दनैः॥ एतैर्दोषैर्न लिप्येत
सुभगा पुत्रिणी भवेत्। रणे राजकुले द्यूते नित्यं
तस्य जयो भवेत्। शस्त्रं वारयते ह्योषा समरे
काण्डदारुणे। गुल्मशूला-क्षिरोगाणां क्षिप्रं
नाश्यति च व्यथाम्॥ शिरोरोगज्वराणां न
नाशिनी सर्वदेहिनाम्। इत्येषा कथिता विद्या
अभयाख्याऽपराजिता॥ एतस्याः स्मृतिमात्रेण
भयं क्वापि न जायते। नोपसर्गा न रोगाश्च न
योधा नापि तस्कराः॥ न राजानो न सर्पाश्च
न द्वेष्टारो न शत्रवः। यक्षराक्षसवेताला न

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-C

शाकिन्यो न च ग्रहाः ॥ अग्नेर्भयं न वाताच्च न समुद्रान्न वै विषात्। कार्मणं वा शत्रुकृतं वशीकरणमेव च॥ उच्चाटनं स्तम्भनं च विद्वेषणमथापि वा। न किञ्चित्प्रभवेत्तत्र यत्रैषा वर्ततेऽभया। पठेद् वा यदि वा चित्रे पुस्तके वा मुखेऽथवा॥ हृदि वा द्वारदेशे वा वर्त्तते ह्यभयः पुमान्॥ हृदये विन्यसेदेतां ध्यायेद्देवींचतुर्भुजाम्॥ रक्तमाल्याम्बरधरां पद्मरागसप्रभाम्। पाशांकुशाभयवरैरलं - कृतसुविग्रहाम्॥ साधकेभ्यः प्रयच्छनतीं मन्त्रवर्णामृतान्यपि। नातः परतरं किञ्चिद्वशीकरणमनुत्तमम्॥ रक्षणं पावनं

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

चापि नात्र कार्या विचारणा। प्रातः कुमारिकाः पूज्याः खाद्यैराभरणैरपि॥ तदिदं वाचनीयं स्यात्तत्प्रीत्या प्रीयते तु माम्। ॐ अथातः सम्प्रवक्ष्यामि विद्यामपि महाबलाम्। सर्वदुष्टप्रशमनीं सर्वशत्रुक्षयंकरीम्॥ दारिद्र्यदुःखशमनीं दौर्भाग्यव्याधिनाशिनीम्। भूतप्रेतपिशाचानां यक्षगन्धर्व-रक्षसाम्॥ डाकिनी शकिनी-स्कंध-कूष्माण्डानां च नाशिनीम्। महारौद्रीं महाशक्तिं सद्यः प्रत्ययकारिणीम्। गोपनीयं प्रयत्नेन सर्वस्वं पार्वतीपतेः। तामहं ते प्रवक्ष्यामि सावधानमनाः शृणु। एकान्हिकं द्व्यन्हिकं च

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

चातुर्थिकार्द्धमासिकम्। द्वैमासिकं त्रैमासिकं तथा चातुर्मासिकम्। पाञ्चमासिकं षाड्मासिकं वातिक पैतिकज्वरम्। श्लैष्मिकं सान्निपातिकं तथैव सततज्वरम्। मौहूर्तिकं पैत्तिकं शीतज्वरं विषमज्वरम्। द्व्यहिनकं त्रयहिनकं चैव ज्वरमेकाह्निकं तथा। क्षिप्रं नाशयते नित्यं स्मरणादपराजिता। ॐ ह्रीं हन हन, कालि शर शर, गौरि धम, धम, विद्ये आले ताले माले गंधे बंधे पच पच विद्ये नाशय नाशय पापं हर हर संहारय वा दुःखस्वप्नविनाशिनि कमलस्थिते विनायकमातः रजनि सन्ध्ये, दुन्दुभिनादे,

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

मानसवेगे, शंखिनि, चक्रणि गदिनि वज्रिणि शूलिनि अपस्मृत्युविनाशिनि विश्वेश्वरि द्रविडि द्राविडि द्रविणि द्राविणि केशवदयितं पशुपतिसहिते दुन्दुभिदमनि दुर्म्मददमनि। शबरि किराति मातंगि ॐ द्रं द्रं ज्रं ज्रं क्रं क्रं तुरु तुरु ॐ द्रं कुरु कुरु। ये मां द्विषन्ति प्रत्यक्षं परोक्षं परोक्षं वा तान् सर्वान् दम दम मर्दय मर्दय तापय तापय गोपय पातय पातय शोषय शोषय उत्साद उत्सादव ब्रह्माणि वैष्णवि माहेश्वरि कौमारि वाराहि नारसिंहि ऐन्द्रि चामुण्डे महालक्ष्मि वैनायिकि औपेन्द्रि आग्नेयि चण्डि नैर्ऋति वायव्ये सौम्ये ऐशानि

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

ऊर्ध्वमधोरक्ष प्रचंडविद्ये इन्द्रोपेन्द्र भगिनि। ॐ नमो देवि जये विजये शांति स्वस्ति-तुष्टि-पुष्टि-विवर्द्धिनि। कामांकुशे कामदुघे सर्वकामवरप्रदे। सर्वभूतेषु मां प्रियं कुरु कुरु स्वाहा। आकर्षणि आवेशनि। ज्वालामालिनि रमणि रामणि, धरणि धारनणि, तपनि तापिनि, मदनि मादिनि, शोषणि संमोहिनि नीलपताके महानीले महागौरि महाश्रिये। महाचांद्रि महासौरि महामायूरि आदित्यरश्मि जाह्नवि। यमघंटे किणि किणि चिन्तामणि। सुगन्धे सुरभे सुरासुरोत्पन्ने सर्वकामदुघे यद्यथा मनीषितं कार्यं तन्मम सिद्धयतु स्वाहा। ॐ

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-C

स्वाहा। ॐ भूः स्वाहा। ॐ भुवः स्वाहा। ॐ स्वः स्वहा। ॐ महः स्वाहा। ॐ जनः स्वाहा। ॐ तपः स्वाहा। ॐ सत्यं स्वाहा। ॐ भूर्भुवः स्वः स्वाहा। यत एववागतं पापं तत्रैव प्रतिगच्छतु स्वाहेत्योम्। अमोघैषा महाविद्या वैष्णवी चापराजिता। स्वयं विष्णुप्रणीता च सिद्धेयं पाठतः सदा। एषा महाबला नाम कथिता तेऽपराजिता। नानया सदृशी रक्षा त्रिषु लोकेषु विद्यते। तमोगुणमयी साक्षाद्रौद्री शक्तिरियं मता। कृतान्तोऽपि यतो भीतः पादमूले व्यवस्थितः। मूलधारे न्यसेदेतां रात्रावेनां च संस्मरेत्। नीलजीमूतसंकाशां

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

तडित्कपिलकेशिकाम्। उद्यदादित्यसंकाशां नेत्रत्रय-विराजिताम्। शक्तिं त्रिशूलं शंखं च पानपात्रं च विभ्रतीम्। व्याघ्रचर्मपरीधानां किंकिणीजालमण्डिताम्। धावंतीं गगन-स्यांतः तादुकाहितपादकाम्। दंष्ट्राकराल-वदनां व्यालकुण्डलभूषिताम्। व्यात्तवक्त्रां ललज्जिह्वां भृकुटीकुटिलालकाम्। स्वभक्त-द्वेषिणां रक्तं पिबन्तीं पानपात्रतः। सप्तधातून् शोषयन्तीं क्रूरदृष्ट्या विलोकनात्। त्रिशूलेन च तज्जिह्वां कीलयनतीं मुहुर्मुहः। पाशेन बद्धवा तं साधमानयन्तीं तदन्तिके। अर्द्धरात्रस्य समये देवीं ध्यायेन्महाबलाम्।

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

यस्य यस्य बदेन्नाम जपेन्मन्त्रं निशान्तके। तस्य तस्य तथावस्थां कुरुते सापि योगिनी। ॐ बले महाबले असिद्धसाधनी स्वाहेत्या अमोघां पठति सिद्धां श्रीवैष्णवीम्॥ श्रीमद्पराजितविद्यां ध्यायेत्। दुःस्वप्ने दुरारिष्टे च दुर्निमित्ते तथैव च। व्यवहारे भवेत्सिद्धिः पठेद्विघ्नोपशान्तये॥

यदत्र पाठे जगदम्बिके मया विसर्गबिन्द्वऽक्षरहीनमीडितम्। ततस्तु सम्पूर्णतमं प्रयान्तु मे संकल्पसिद्धिस्तु सदैव जायताम्॥

तव तत्त्वं न जानामि कीदृशेंसि महेश्वरि। यादृशसि महादेवी तादृशायै नमो नमः॥

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-

इन्द्राक्षी स्तोत्र

(इस स्तोत्र का पाठ करने से इन्द्र की शक्ति इन्द्राक्षी सभी विघ्न बाधाओं को दूर रखते हुए गर्भ की रक्षा स्वयं करती हैं।)

श्रीगणेशाय नमः॥ ॐ अस्य श्रीइन्द्राक्षी-स्तोत्रमन्त्रस्य सहस्राक्षऋषिः॥ इन्द्राक्षी देवता॥ अनुष्टुप् छन्दः॥ महालक्ष्मी बीजम्॥ भुवनेश्वरीति शक्तिः॥ भवानीति कीलकम्॥ ॐ श्रौं ह्रीं क्लीं इति बीजानि॥ मम सर्वाभीष्टसिद्ध्यर्थे श्रीमदिन्द्राक्षी-स्तोत्रजपे विनियोगः॥ ॐ इन्द्राक्षी इत्यंगुष्ठाभ्यां नमः॥ ॐ महालक्ष्मीरिति तर्जनीभ्यां नमः॥ ॐ महेश्वरीति मध्यमाभ्यां

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

नमः ॥ ॐ अम्बुजाक्षीत्यनामिकाभ्यां नमः ॥
ॐ कात्यायनीति कनिष्ठिकाभ्यां नमः ॥
ॐ कौमारीति करतलकरपृष्ठाभ्यां नमः ॥
ॐ इन्द्राक्षीति हृदयाय नमः ॥ ॐ
महालक्ष्मीरिति शिरसे स्वाहा ॥ ॐ
माहेश्वरीति शिखायै वौषट् ॥ ॐ
अम्बुजाक्षीति कवचाय हुम् ॥
ॐ कात्यायनीति नेत्रत्रयाय वौषट् ॥
ॐ कौमारीत्यस्त्राय फट् ॥ ॐ
भूर्भुवःस्वरोम् इति दिग्बन्धनम् ॥ पूर्वस्यां
पातु मां ब्राह्मी चाग्नेय्यां तु महेश्वरी ॥ कौमारी
पातु याम्ये वै नैर्ऋत्यां पातु भैरवी ॥ १ ॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

पश्चिमे पातु वाराही वायव्ये नारसिंहिका ॥
कालरात्रिरुदीच्यां वा ऐशान्यां सर्वशक्तिधृक् ॥ २ ॥ ऊर्ध्वं मे भैरवी पातु चाधःस्थं विंध्यवासिनी ॥ यद्यत्तु विषमं स्थानं तत्तद्रक्षतु चेश्वरी ॥ ३ ॥

॥ अथ ध्यानम् ॥

इन्द्राणीं द्विभुजां देवीं पीतवस्त्रद्वयान्विताम् ॥
वामहस्ते वज्रधरां दक्षिणेन वरप्रदाम् ॥ १ ॥
इन्द्राक्षीं युवतीं देवीं नानालंकारभूषिताम् ॥
प्रसन्न-वदनाम्भोजामप्स-रोगणसेविताम् ॥ २ ॥
द्विभुजां सौम्यवदनां पाशांकुशधरां पराम् ॥
त्रैलोक्यमोहिनीं देवीमिंद्राक्षीनामकीर्तिताम् ॥ ३ ॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-

॥ अथ मंत्रः ॥

ॐ ऐं ह्रीं श्रीं क्लीं क्लूं इन्द्राक्ष्यै नमः ॥

॥ इन्द्र उवाच ॥

इन्द्राक्षी नाम सा देवी दैवतैः समुदाहृता ॥ गौरी शाकंभरी देवी दुर्गानाम्नीति विश्रुता ॥ ४ ॥ कात्यायनी महादेवी चंद्रघण्टा महातपा। सावित्री सा च गायत्री ब्रह्माणी ब्रह्मवादिनी ॥ ५ ॥ नारायणी भद्रकाली रुद्राणी कृष्णपिंगला ॥ अग्निज्वाला रौद्र मुखी कालरात्रि-स्तपस्विनी ॥ ६ ॥ मेघश्यामा सहस्राक्षी मुक्तकेशी जलोदरी ॥ महादेवी मुक्तकेशी घोररूपा महाबला ॥ ७ ॥ अजिता

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-

भद्रदा नन्दा रोगहंत्री शिवप्रिया॥ शिवदूती कराली च प्रत्यक्षा परमेश्वरी॥ ८॥ सदा संमोहिनी देवी सुन्दरी भुवनेश्वरी॥ इन्द्राक्षी इन्द्ररूपा च इन्द्रशक्तिः परायणा॥ ९॥ महिषासुरसंहत्री चामुण्डा गर्भदेवता॥ वाराही नारसिंही च भीमा भैरवनादिनी॥ १०॥ श्रुतिः स्मृतिर्धृतिर्मेधा विद्या लक्ष्मीः सरस्वती॥ अनन्ता विजया पूर्णा मानस्तोकाऽ-पराजिता॥ ११॥ भवानी पार्वती दुर्गा हैमवत्यम्बिका शिवा॥ एतैर्नामशतैर्दिव्यैः स्तुता शक्रेण धीमता॥ १२॥ आयुरारोग्य-मैश्वर्यं वित्तं ज्ञानं यशो बलम्॥ नाभिमात्रे जले

Kirtikant Sharma Collection, Najafgarh

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Gra

स्थित्वा सहस्रपरिसंख्यया ॥ १३ ॥ जपेत्स्तोत्रमिमं मन्त्रं वाचां सिद्धिर्भवेत्ततः ॥ अनेन विधिना भक्त्या मन्त्रसिद्धिश्च जायते ॥ १४ ॥ संतुष्टा च भवेद्देवी प्रत्यक्षा सम्प्रजायते ॥ शत-मावर्तयेद्यस्तु मुच्यते नात्र संशयः ॥ १५ ॥ आवर्तनसहस्रेण लभ्यते वाञ्छितं फलम् ॥ सायं शतं पठेन्नित्यं षण्मासा-त्सिद्धिरुच्यते ॥१६ ॥ चोरव्याधि-भयस्थाने मनसा ह्यनुचिन्तयन् ॥ संवत्सर-मुपाश्रित्य सर्वकामार्थ-सिद्धये ॥ १७ ॥ राजानं वश्यमाप्नोति षण्मासान्नत्र संशयः ॥ १८ ॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

धन प्राप्ति के लिए—

धनदा स्तोत्र

शिव उवाच

अथातः सम्प्रवक्ष्यामि धनदास्तोत्रमुत्तमम्।
यथोक्तं सर्वतन्त्रेषु इदानीं तत् प्रकाशितम्॥
नमः सर्वस्वरूपेण नमः कल्याणदायिके।
महासम्पत्प्रदे देवि धनदायै नमोऽस्तु ते॥१॥
महाभोगप्रदे देवि महाकामप्रपूरिते।
सुखमोक्षप्रदे देवि धनदायै नमोऽस्तु ते॥२॥
ब्रह्मरूपे सदानन्दे सदानंदस्वरूपिणि।
द्रुतसिद्धिप्रदे देवि धनदायै नमोऽस्तु ते॥३॥
उद्यत्सूर्यप्रकाशाभे उद्यदादित्यमण्डले।
शिवतत्वप्रदे देवि धनदायै नमोऽस्तु ते॥४॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

विष्णुरूपे विश्वमते विश्वपालनकारिणि।
महासत्वगुणाक्रान्ते धनदायै नमोऽस्तु ते॥५॥
शिवरूपे शिवानन्दे कारणानंद-विग्रहे।
विश्वसंहाररूपे च धनदायै नमोऽस्तु ते॥६॥
पंचतत्वस्वरूपे च पंचाचार-सदारते।
साधकाभीष्टदे देवि धनदायै नमोऽस्तु ते॥७॥
इदं स्तोत्रं मया प्रोक्तं साधकाभीष्टदायकम्।
यः पठेत् पाठयेद्वापि स लभेत् सकल फलम्॥८॥
त्रिसन्ध्यं यः पठेन्नित्यं स्तोत्रमेतत् समाहितः।
स सिद्धिं लभते शीघ्रं नात्रकार्या विचारणा॥९॥
इदं रहस्यं परमं स्तोत्रं परमदुर्लभम्।
गोपनीयं प्रयत्नेन स्वयोनिरिव पार्वति॥१०॥
अप्रकाश्यमिदं देवि गोपनीयं परात्परम्।
प्रपठेन्नात्र सन्देहो धनवान् जायतेऽचिरात्॥११॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

सर्व अभीष्ट फलप्रद—

धनदा देवी स्तोत्र

शिव उवाच

अथातः सम्प्रवक्ष्यामि धनदां सर्वसिद्धिदाम्।
यामाराध्य महादेवि कुवेरो धननायकः ॥१॥
दान्तं विन्दुसमारूढं महामायां हरिप्रियाम्।
रतिप्रिये ततः पश्चाद् वह्निजायां ततः प्रिय ॥२॥
नवाक्षरो महामंत्रो द्रुतं सिद्धिप्रदायकः।
कुवेरोऽस्य ऋषिःप्रोक्तंःपङ्क्तश्छंद उदहृतम् ॥३॥
देवता धनदा देवी सर्वसिद्धि प्रदायिनीं।
धर्मार्थकाममोक्षाख्यश्चतुर्वर्गफलप्रदा ॥४॥
षड्दीर्घमायया चैव षडंगन्यासमाचरेत्।
ध्यानमस्याः प्रवक्ष्यामि येन सिद्धी भवेन्नरः ॥५॥

Kirtikant Sharma Collection, Najafgarh

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-G

ओं देवीं कांचनकांतिकायविमलां
रक्तां शुकाच्छादितां हेमाम्भोजयुगाभयाङ्
कुशकरीं रत्नोल्लसत्कुण्डलाम्॥६॥
सर्वाभीष्टफलप्रदां त्रिनयनां नागेन्द्रहारोज्ज्वलां
वन्दे सर्वभयापहां त्रिजगतां पापापहारीं पराम्॥७॥
स्वकीयात्मस्वरूपां तां भावयेच्चित्स्वरूपिणीम्।
एवं ध्यात्वा महेशानि मानसः पूजनं चरेत्॥८॥
अर्घ्यपात्रं स्थापयित्वा धेनुयोनिं प्रदर्शयेत्।
पीठपूजां ततः कृत्वा ततः पीठन्तु संजपेत्॥९॥
आधारशक्तिमारभ्य यजेत्पद्मासनं प्रिये।
प्रणवादिनमोऽन्तेन पूजयेत्साधकाग्रणीः॥१०॥
पुनर्ध्यात्वा महेशानि मूलेनावाहनं चरेत्।
षडंगेन च सम्पूज्य जीवन्यासं समाचरेत्॥११॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

देवायै च ततः पश्चाद्योगात्मकमनुस्मरेत्।
नवयोन्यात्मकं चक्रं विलिखेत् कर्णकोपरि॥ १२॥
द्विदलं पद्ममालिख्य चतुरस्त्रं ततो बहिः।
कोणेषु वज्रं संलिख्य मध्ये बीजं समुल्लिखेत्॥ १३॥
इदं यन्त्रं महेशानि साक्षाद् देवीस्वरूपकम्।
लक्ष्मीं पद्मां पद्मालयां श्रियं चैव हरिप्रियाम्॥ १४॥
शंखां तु कमलां चैव अब्जां च चंचलां तथा।
लोलां च प्रणवाद्येता नमोऽन्तेन प्रपूजयेत्॥ १५॥
पुनर्मध्ये ततो देवीं देव्या हस्ते समर्पयेत्।
प्राणायामं ततः कृत्वा प्रणामाष्टांगमाचरेत्॥ १६॥
अथोत्थाय महेशानि विशेषार्घ्यं निवेदयेत्।
आत्मसमर्पणं कृत्वां विहरेच्च निजेच्छया॥ १७॥

卐 卐

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

धन एवं पुत्रदायक—

धनदा कवच

देव्युवाच

धनदा या महाविद्या कथिता न प्रकाशिता।
इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम्॥ १॥

शिव उवाच

शृणु देवि प्रवक्ष्यामि कवचं मन्त्रविग्रहम्।
सारात्सारतरं देवि कवचं मन्मुखोदितम्॥ २॥
धनदा कवचस्यास्य कुवेर ऋषिरीरितः।
पङ्क्तिश्छन्दो देवता च धनदा सिद्धिदा सदो॥ ३॥
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः।
धं बीजं मे शिरः पातु हीं बीजं मे ललाटकम्॥ ४॥
श्रीं बीजं मे मुखं पातु रकारं हृदि मेऽवतु।
तिकारं पातु जठरं प्रिकारं पृष्ठतोऽवतु॥ ५॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

येकारं जङ्घयोर्युग्मे स्वाकारं पादयोर्युगे।
शीर्षादिपादपर्यन्तं हाकारं सर्वतोऽवतु॥६॥
इत्येतत्कथितं कान्ते कवचं सर्वसिद्धिदम्।
गुरुमभ्यर्च्य विधिवत् कवचं प्रपठेद्यदि॥७॥
शतवर्ष सहस्त्राणां पूजायाः फलमाप्नुयात्।
गुरुपूजां विना देवि नहि सिद्धिः प्रजायते॥८॥
गुरुपूजात्परो भूत्वा कवचं प्रपठेत्ततः।
सर्वसिद्धियुतो भूत्वा विचरेद् भैरवो यथो॥९॥
प्रातःकाले पठेद्यस्तु मन्त्रजापपुरः सरम्।
सोऽभीष्टफलमाप्नोति सत्यं सत्यं न संशयः॥१०॥
पूजाकाले पठेद्यस्तु देवीं ध्यात्वा हृदम्बुजे।
षण्मासाभ्यन्तरे सिद्धिर्नात्र कार्या विचारणा॥११॥
सायंकाले पठेद्यस्तु स शिवो नात्र संशयः।
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यादि॥१२॥

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

पुरुषो दक्षिणे वाहौ योषिद्वामभुजे तथा।
सर्वसिद्धियुती भूत्वा धनवान् पुत्रवान् भवेत्॥१३॥
इदं कवचमज्ञात्वा यो जपेद्धनदां शुभे।
शस्त्रघातमवाप्नोति सोऽचिरान्मृत्युमाप्नुयात्॥१४॥
कवचेनावृतो नित्यं यो हि यत्रैव गच्छति।
तत्रैव स महादेवि सम्पूज्यो नात्र संशयः॥१५॥

卐 卐

उच्चकोटि का आध्यात्मिक साहित्य, धार्मिक ग्रन्थ, पूजा-पाठ व कर्मकांड की पुस्तकें तथा स्तोत्र, कवच, उपासना, चालीसा, स्तुति और सभी प्रकार की हिन्दू धर्म से सम्बन्धित पुस्तकें प्राप्त करने के लिए सम्पर्क करें—

रणधीर प्रकाशन, रेलवे रोड, हरिद्वार

Kirtikant Sharma Collection, Najafgarh

Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE

Kirtikant Sharma Collection, Najafgarh

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-

रणधीर प्रकाशन हरिद्वार

Kirtikant Sharma Collection, Najafgarh